**सोमगर्भ** पु० सोमस्य तदात्मकामृतस्यौषधस्य गर्भः स्थानम्। विष्णौ त्रिका०।

**सोमज** न० सोमात् तत्सञ्चरितौषधिस्थरसपानात् जायते जन-ड। १दुग्धे हेमच०। २चन्द्रजाते त्रि०। ३बुधे पु०।

**सोमतीर्थ** न० सोमेन तपस्तप्त्वा कृतं तीर्थम् शाक०। प्रभास-तीर्थे त्रिका०। "यत्र तप्तं तपस्तेन सोमेन सुमहात्मना। पञ्च वर्षसहस्राणि तथैवाङ्गुष्ठसुखः स्थितः। एवमूर्द्धतः पुनः पञ्च पञ्च मौनव्रतस्तथा। तथैवैकेन पादेन दश पञ्च च तिष्ठता। एवमुग्रं तपः कृत्वा कान्तिमानभवच्च सः। मत्तापराधान् मुक्तश्च ब्राह्मणानां पतिस्तथा" वराहपु०।

**सोमधारा** स्त्री सोमस्य धारेव। आकाशे त्रिका०।

**सोमप** पु० सोमं तद्रसं पिबति पा-क। १यज्ञे सोमरसपान-कर्त्तरि २पितृगणभेदे ब०व०। पा-क्विप् सोमपाप्यत्र।

**सोमपत्र** पु० सोमस्य ओषधिविशेषस्येव पत्रमस्य। (उलुखड़) तृणभेदे शब्दच०।

**सोमपीति(थि)न्** पु० पीतमनेन इनि सोमं पीतौ पृषो० वा तस्य थः। यज्ञे सोमरसपायिनि अमरः। पा-क्विप् सोमपीवाप्यत्र।

**सोमबन्धु** पु० सोमस्य बन्धुः, सोमो बन्धुरस्य वा। १सूर्य्ये तद्वृद्धिकरत्वात् तस्य तथात्वम्। २चन्द्रजे बुधे पु० ज्यो० ३कुमुदे न०। [वंश्ये क्षत्रिये च ४जिनराजभेदे हेम०।

**सोमभू** पु० सोम एव भूरुत्पत्तिस्थानं यस्य। १बुधपक्षे २चन्द्र-

**सोमयाग** पु० सोमनामको यागः। त्रिवर्णसाध्ये सोमरस-पानाङ्गके यागभेदे।

"नारद उवाच "सोमयागविधानञ्च ब्रूहि मां मुनि-सत्तम!। कथं तं कारयामास गुरुस्स किं फलं परम्"। नारायण उवाच "ब्रह्महत्याप्रशमनं सोमयागफलं मुने!। वर्षं सोमलतापानं यतमानः करोति च। वर्षमेकं फलं भुङ्क्ते वर्षमेकं जलं सदा। त्रैवार्षिकमिदं यागं सर्वपापप्रणाशनम्। यस्य त्रैवार्षिकं धान्यं नि-हितं भृत्यवृत्तये। अधिकं वापि विद्येत स सोमं पातु-मर्हति। महाराजश्च देवो वा यागं कर्त्तुमलं मुने!। न सर्वसाध्यो यज्ञोऽयं बह्वन्नो बहुदक्षिणः" ब्रह्मवै० श्रीकृष्णज० ६० अ०। सोमशब्दे दृश्यम्।

**सोमयाजिन्** पु० सोमेन यजते यज-णिनि। सोमयाग-कर्त्तरि। तस्य सौत्रामण्यामधिकारः सौत्रामणीशब्दे दृश्यम्।

**सोमयोनि** न० सोमः योनिरस्य। चन्दनभेदे शब्दच०।

**सोमराजी** स्त्री सोमेन राजते राज-अच् गौरा० ङीष्। (सोमराज) १ओषधिभेदे। २वाकुच्यां भावप्र०। "अवल्गुजा वाकुची स्यात् सोमराजी सुपर्णिका" इत्युपक्रमे "वाकुची मधुरा तिक्ता कटुपाका रसायनी। विष्टम्भहृद्धिमा रुच्या सरा श्लेष्मास्रपित्तनुत्। रूक्षा हृद्या श्वासकुष्ठमेहज्वरकृमिप्रणुत्। तत्फलं पित्तलं कुष्ठ-कफानिलहरं कटु। केश्यं त्वच्यं कृमिश्वासकासशोथाम-पाण्डुहृत्" भावप्र०। स्वार्थे क। सोमराजिकाप्यत्र। राज-णिनि। सोमराजिन् अप्यत्र पु० अमरः। [राजनि०

**सोमलता** स्त्री सू-मन् कर्म०। स्वनामख्यातायां लतायाम्

**सोमलतिका** स्त्री सोमलतेव इवार्थे कन् अत इत्त्वम्। १गुडूच्याम् राजनि०। स्वार्थे क। २सोमलतायाञ्च।

**सोमवंश** पु० सोमस्य वंशः। १चन्द्रवंशे २चन्द्रावधिके गोत्र-परम्पराजाते क्षत्रिये भाग० ६स्कन्धे दृश्यम्।

**सोमवल्क** पु० सोमस्येव वल्कोऽस्य। १करञ्जे जटा०। २रीठा-करञ्जे राजनि० ३श्वेतखदिरे ४कट्फले च मेदि०।

**सोमवल्लिका** स्त्री सोमवल्लीव कायति कै-क। सोमराज्याम् अमरः। स्वार्थे क। २सोमलतायाम्। सोमवल्लर्य्यप्यत्र।

**सोमवल्ली** स्त्री सोमाया लताया वल्ली। १गुडूच्याम् अमरः। सोमरूपा वल्ली। २सोमलतायाम् भरतः। ३सोमराज्यां शब्दर०।४ब्राह्म्यां ५सुदर्शनायां ६पातालगरुड्यां राजनि०। "सोमवल्ली महागुल्मा यज्ञश्रेष्ठा धनुर्लता। सोमार्हा गुल्मवल्ली च यज्ञवल्ली द्विजप्रिया। सोमक्षीरा च सोमा च यज्ञाङ्गा रुद्रसंख्यया। सोमवल्ली कटुः शीता मधुरा पित्तदाहहृत्। तृष्णा विशेषात् शमनी पावनी यज्ञसाधनी" राजनि०।

**सोमवासिन्** पु० सोमं तद्रसं वसति वस-णिनि। सोमरस-पानाधिक्ये सुखेन सोमवमनकर्त्तरि तस्य सौत्रामण्या-मधिकारः सौत्रामणीशब्दे दृश्यम्।

**सोमवार** पु० सोमस्वामिको वारः। चन्द्रस्वामिके दिने।

**सोमविक्रयिन्** पु०सोमं विक्रीणाति वि+क्री-णिनि। सोम-लतायाः विक्रेतरि "पापो हि सोमविक्रयी" श्रुतिः।

**सोमवृक्ष** पु० सोम इव वृक्षः। १कट्फलवृक्षे रत्नमा० २श्वेत-खदिरे च राजनि०। [राजनि०।

**सोमसार** पु० सोम इव शुभ्रः सारोऽस्य। श्वेतखदिरे

**सोमसिद्धान्त** पु० सोमकृतः सिद्धान्तः। चन्द्रप्रोक्ते ज्यो-तिषसिद्धान्तग्रन्थभेदे जटा०। [त्रिका०।

**सोमसिन्धु** पु० सोमस्यामृतस्य सिन्धुरिव आधारः। विष्णौ